# ।। मूकाम्बिकापञ्चरत्नम् ।।

सन्तापनाशनिपुणां सकलाभिवन्द्यां
सद्बुद्धिदानव्रतदीक्षितमातृरूपाम्
मूकाय वाग्विभवदानपरां महेशीं
मूकाम्बिकां भगवतीं शरणं प्रपद्ये।। १

कार्यं मयाम्ब तव पादयुगार्चनम् हि
जप्यं च देवि तव नामगणाः सदापि।
ध्येयं त्वदीयवरदाभयचारुरूपं
मूकाम्बिकां भगवतीं शरणं प्रपद्ये।। २

या त्वापभूम्यनिलतेजवियत्सवरूपं
धत्ते या लसति मातृगणस्वरूपा ।
या पार्वती शाङ्करशक्ति यास्तां
मूकाम्बिकां भगवतीं शरणं प्रपद्ये।। ३

षड्वैरिपाटनपरां त्रिगुणात्मिकाञ्च
अष्टप्रदाननिपुणां जगदेकमाताम् ।
त्रय्यन्तरात्मरतभूमिसुराभिवन्द्यां
मूकाम्बिकां भगवतीं शरणं प्रपद्ये।। ४

यस्याः स्मृतिर्हरविरिञ्चमरादिदेव
वृन्दस्य सर्वविजये प्रथमं हि हेतुः ।
यामामनन्ति प्रणवार्थमितीह वेदाः
मूकाम्बिकां भगवतीं शरणं प्रपद्ये।। ५

मूकाम्बिकामहादेव्याः
स्तोत्रमेतत् पठेद्यति ।
तस्य वाणी सभामध्ये
स्खलिता न भविष्यति ।।